# श्री भीष्म स्तुति

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥१ ॥

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।वपुरलककुलावृताननाब्जं
विजयसखे रतिरस्तुमेऽनवद्या ॥२ ॥

युधि तुरगरजोविधूम्रविष्वक्-कचलुलितश्रमवार्यलङ्कृतास्ये ।मम
निशितशरैर्विभिध्यमान-त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥३ ॥

सपदि सखि वचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ।स्थितवति
परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥४ ॥

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ।
कुमतिमहरदात्मविद्यया यः चरणरतिः परमस्य तस्य मेऽस्तु ॥५ ॥

स्वनिगममपहाय मत्प्रतिज्ञा-मृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गु-र्हरिरिव हन्तुमिभं गतोत्तरीयः ॥६ ॥

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः ॥७ ॥

ललितगतिविलासवल्गुहास-प्रणयनिरीक्षणकल्पितोरुमानाः ।कृतमनुकृतवत्य
उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥८ ॥

मुनिगणनृपवर्यसङ्कुलेऽन्तः-सदसि युधिष्ठिरराजसूय एषाम् ।अर्हणमुपपेद
ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥९ ॥

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।प्रतिदृशमिव
नैकधार्कमेकं समधिगतोऽस्मि विधूत भेदमोहः ॥१० ॥

Source: https://www.bharattemples.com/shri-bheesam-satuti/

Bharat Temples

Complete Bhajans Collections - Download Free Android App
https://play.google.com/store/apps/details?id=com.numetive.bhajans

Facebook: https://www.facebook.com/bharattemples/
Telegram: https://t.me/bharattemples
Youtube: https://www.youtube.com/channel/UC24oJCxZJyhhKzSUD-Lt9Tw